# 4.1.3 (QIM)

विश्वविद्यालयस्य परिसरे शैक्षणिकभवने एकस्मिन् प्रकोष्ठे स्नानागारेण सह शौचालय-सुविधायुक्तं (अटैच्ड टॉयलेट-बाथरूम) महिलाकेन्द्रम् अस्ति। तत्र विश्वविद्यालये पठतां छात्राणां कृते प्राथमिकोपचाराय आरोग्यकेन्द्रे औषधसुविधा उपलब्धा अस्ति। तत्र एकः पर्यङ्कः, आसन्दः ड्रीसीङ्गोत्पीठिका (सज्जोत्पीठिका) च अस्ति।

- ❖ विश्वविद्यालयस्य परिसरे सांस्कृतिकप्रवृत्त्यै एकः वर्गखण्डः वर्तते। तत्र छात्राः एकपात्रियाभिनयम्, नृत्यम्, गरबा-नृत्यम्, नाटकम् इत्यादिप्रवृत्तीः कर्तुं शक्नुवन्ति।
- ❖ विश्वविद्यालयस्य परिसरे विश्वविद्यालय-अनुदान-आयोगस्य आलोके एकः छात्रसमस्यानिवारणप्रकोष्ठः (Students' Grievance Redressal Cell) अपि अस्ति। यस्मिन् छात्राणां सर्वेषां प्रश्नानां निराकरणं भवति।
- ❖ विश्वविद्यालये छात्राणाम् उपचाराय एकस्मिन् प्रकोष्ठे वैद्यायाः व्यवस्था अस्ति । तत्र छात्रैः सह अध्यापकानामपि प्राथमिकः उपचारः भवति। विद्यार्थिनीनां कृते उपचारः सुलभः स्यात् तथा तासां प्रश्नानां निराकरणं स्यात् तदर्थं वैद्यायाः व्यवस्था वर्तते।
- ❖ विश्वविद्यालयस्य परिसरे वित्तकोषः नास्ति किन्तु वित्तव्यवहारस्य कृते समीपे एव वित्तकोषः अस्ति। यत्र समग्रविश्वविद्यालयस्य वित्तव्यवहारः भवति। छात्रवृत्तिः तथा अन्ये अपि विषयाः यदा आयान्ति तदा वित्तकोषस्य अधिकारिणः विश्वविद्यालयम् आगत्य योग्यं मार्गदर्शनं कुर्वन्ति।
- ❖ विश्वविद्यालयस्य सभाखण्डे "फ़िल्म क्लब" अन्तर्गतं सप्ताहे एकवारं छात्राणां कृते चलचित्रं प्रदर्श्यते। तेन छात्राणां मनोरञ्जनं तथा तेभ्यः विद्याविषयिणी-प्रेरणा प्रदीयते।
- ❖ विद्यार्थिनीनां प्रश्नानां निराकरणाय एकस्मिन् प्रकोष्ठे महिलासुविधा-केन्द्रं कृतम् अस्ति। तत्र विद्यार्थिन्यः सङ्कोचं विना स्वकीयप्रश्नान् उपस्थापयन्ति तथा समितिद्वारा तत्प्रश्नानां योग्यं समाधानं भवति।
- ❖ विश्वविद्यालये अध्ययनरतानां छात्राणां कृते आवासस्य भोजनस्य च व्यवस्था निःशुल्कं क्रियते। छात्राणां कृते सुविधायुक्तस्य आवासस्य व्यवस्था अस्ति तथा छात्रालयगतानां प्रश्नानां निराकरणाय छात्रावासस्य अवधानाय च एकस्य गृहपतेः तथा द्वयोः गृहमात्रोः व्यवस्था अस्ति।
- ❖ विश्वविद्यालये छात्राणां कृते क्रीडनाय क्रीडाङ्गणं तथा साधनानि सन्ति। विश्वविद्यालये सुन्दरम् उद्यानमपि अस्ति। छात्राणां शारीरिकविकासाय व्यायामशालायाः अपि व्यवस्था अस्ति।
- ❖ विश्वविद्यालये शैक्षणिकभवने सभागारस्य व्यवस्था अस्ति। तत्रैव विविधाः कार्यक्रमाः समायोज्यन्ते। प्रतिभावन्तः छात्राः कार्यक्रमेषु स्वां प्रतिभां प्रदर्शयन्ति। ते छात्राः राज्यस्तरे राष्ट्रस्तरे च प्रतिभां प्रदर्शयन्ति।

- विश्वविद्यालये छात्राणां मानसिकविकासाय योगकेन्द्रमपि अस्ति। तत्र प्राध्यापकेभ्यः योगविषयकं योग्यं मार्गदर्शनं छात्रैः प्राप्यते। तदतिरिच्य क्रीडाक्षेत्रे अपि छात्राणां विकासाय शारीरिकाध्यापकस्य व्यवस्था अस्ति। तस्य मार्गदर्शनेन छात्राः राज्यस्तरीय-राष्ट्रस्तरीय-स्पर्धासु भागं गृह्णन्ति तथा पुरस्कृताः अपि भवन्ति।
- विश्वविद्यालये शास्त्रि-आचार्यादि-पदव्या सह पदविका (डिप्लोमा) अभ्यासक्रमः अपि प्रचलति। तत्र योग-कर्मकाण्ड-ज्योतिष-वास्तु-सङ्गीत-संस्कृतशिक्षण-मंदिर-व्यवस्थापन-वैदिकगणित-इत्यादिषु विषयेषु पदविका (डिप्लोमा) अभ्यासक्रमाः अपि चलन्ति।
- विश्वविद्यालये छात्राणां तकनीकीक्षेत्रे विकासाय सङ्गणकशाला अस्ति। तत्र छात्राः सङ्गणकयन्त्राणाम् उपयोगं कुर्वन्ति अभ्यासं च कुर्वन्ति। तदतिरिच्य शैक्षणिकभवने Wi-Fi सुविधा अपि अस्ति।
- छात्राणां बौद्धिकविकासाय विश्वविद्यालयेन मेधा-पत्रिकायाः सम्पादनं क्रियते। तस्यां पत्रिकायां छात्राः स्वप्रतिभानुसारं लेखम्, पद्यम्, गीतम्, समस्यापूर्तिम्, लिप्यन्तरणं प्रश्नोत्तराणि चेत्यादिकं विलिख्य विश्वविद्यालयस्य सूचनाफलके स्थापयन्ति।